जागरः, जागरः, जिजागरिषः ;
जागरितुम्, जागरयितुम्, जिजागरिषितुम् ;
जागरणम्, जागरणम्, जिजागरिषणम् ;
[1]जागर्या-जागरा, जागरणा, जिजागरिषा ;
जागरित्वा, जागरयित्वा, जिजागरिषित्वा ;
सञ्जागर्य, [2]सञ्जागरय्य, सञ्जिजागरिष्य ;
जागरम् २, जागरित्वा २, } जागरम् २, जागरयित्वा २, } जिजागरिषम् २ ; जिजागरिषित्वा २ ; }
[3]जागृविः.

(599) "जि जये" (I-भ्वादिः-561. अक. अनि. पर.)

जयः = उत्कर्षप्राप्तिः, अभिभवश्च। आद्ये अकर्मकः, द्वितीये सकर्मकः।
'जयेज्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः ॥
उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयेऽर्थे सकर्मकः।' (श्लो. 13-14) इति देवः
[4]जायकः-यिका, [5]जापकः-पिका, [6]जिगीषकः, [7]जेजीयकः-यिका ;

1. 'जागर्तेरकारो वा' (वा. 3-3-100) इति स्त्रियां भावादौ क्तिन्नपवादः शप्रत्ययः। शस्य सार्वधातुकत्वात् 'सार्वधातुके यक्' (3-1-67) इति यकि, पूर्वविप्रतिषेधेन रिङादेशं बाधित्वा गुणे अदन्तत्वेन टापि रूपम्। पक्षे, अकार-प्रत्यये टापि **जागरा** इति रूपम्। 'स्त्रियां क्तिन्' (3-3-94) इति क्तिन् तु 'अनेकाज्भ्यो धातुभ्यो न' इति 'आद्यन्तवदेकस्मिन्' (1-1-21) इत्यत्र **कैयटे** स्पष्टम्।
2. ण्यन्ताल्ल्यपि गुणे 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।
3. 'जॄशॄस्तॄजागृभ्यः क्विन्' [द. उ. 1-24] इति क्विन्प्रत्ययः। **जागर्तीति जागृविः** = अग्निः, राजा च। अत्र क्विनि इकारः प्रयोगघटकः। न तु उच्चारणार्थः।
4. 'अचो ञ्णिति' (7-2-115) इति वृद्धौ, आयादेशे च रूपम्। एवं णमुल्यपि।
5. ण्यन्ते 'क्रीङ्जीनां णौ' (6-1-48) इत्यात्वे, 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ' (7-3-36) इति पुगागमे रूपम्। एवं ण्यन्ते सर्वत्र ज्ञेयम्।
6. 'सन्लिटोर्जेः' (7-3-57) इत्यभ्यासादुत्तरस्य कुत्वेन गकारः। 'इको झल्' (1-2-9) इति सनः कित्वनिषेधाद् गुणो न। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
7. यङि, 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः। एवं यङन्ते सर्वत्र ज्ञेयम्।